# कामकोटिपीठवासिनि

## रागम्: सौगन्धिनि     ताळम्: आदि

### श्री मुत्तुस्वामि दीक्षित विरचिता

**पल्लवि**

कामकोटिपीठवासिनि सौगन्धिनि
मामव गुरुगुहजननि रञ्जनि

**समष्टिचरणम्**

सामगानलोले श्रीबाले सद्गुणशीले कृपालवाले
श्यामळेऽतिकोमळेऽतिललिते
सकलभुवनजननि दुरितभञ्जनि

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇